Regd. No. KA/SK/MYS-107/2015-17
R.N.I. No. 20007/70

स्थापना : 1970

E-mail-sudharma.sanskritdaily@gmail.com
E-paper-sudharma.epapertoday.com
Website-www.sudharmasanskritdaily.in

# सुधर्मा

संस्थापकसम्पादकः
गीर्वाणवाणीभूषणं विद्यानिधिः
पण्डित कळले नडादूरु वरदराजय्यङ्गार्यः

केन्द्र-कर्णाटकसर्वकाराभ्यां पुरस्कृता अद्वितीया संस्कृतदिनपत्रिका

SUDHARMA-THE ONLY SAMSKRITHA DAILY

सम्पुटः-४७ सञ्चिका -७३ मैसूरु श्रीदुर्मुखीनामसंवत्सरे दक्षिणायणे शरदृतौ आश्वयुजकृष्ण प्रतिपदादि द्वितीयायां अश्विनीनक्षत्रयुक्त सोमवासरः १७ अक्टोबर २०१६ मूल्यम्: ₹ १.२५

## सुभाषितम्

लोभश्चेदगुणेन किं पिशुनता यद्यस्ति किं पापकैः
सत्यं चेत्तपसा च किं शुचिमनो यद्यस्ति तीर्थेन किम् ।
सौजन्यं यदि किं बलेन महिमा यद्यस्ति किं मण्डनैः
सद्विद्या यदि किं धनैरपयशो यद्यस्ति किं मृत्युना ।।

## दीपा प्रत्यर्पयति कारयानम्

हैदराबाद्-कतिपयदिनेषु पूर्वं रियो नगरे सम्पन्नायाम् ओलम्पिक् क्रीडायां जिम्न्यास्टिक् क्रीडायाम् अद्भुतं प्रदर्शनं विधाय चतुर्थं स्थानं प्राप्तवती अगर्तलानगरस्य क्रीडित्री दीपाकर्माकरः। अतः तस्यै देशस्य बहुषु राज्येषु सम्मानादिकं प्रदत्तम्। हैदराबादनगरस्य ब्याड्मिण्टन् संस्थायाः अध्यक्षः चामुण्डेश्वरीनाथः दीपायै अभिनन्दनाय उपायनरूपेण बहुमूल्यं कारयानं प्रदत्तवान्। परं दीपा अधुना तच्च कारयानं प्रत्यर्पयितुम् इष्टवती। ''बहुवैशिष्ट्ययुतस्य बहुमूल्यस्य अस्य कारयानस्य निर्वहणं क्लेशाय कल्पते। अतः कारयानस्यापेक्षया तद्वाहनमूल्यसमं धनं दीयते चेत् उपयोगाय कल्पते। अगर्तलानगरस्य मार्गाः अत्यन्तं सङ्कीर्णाः सन्ति। तथैव मार्गाः अपायमपि आह्वयन्ति। अतः नगरे एतादृशस्य वैभवोपेतस्य बृहतः कारयानस्य चालनं न सुखायते। एवमेव नगरे अस्य कारयानस्य निर्वहणकार्यशालाः अपि न सन्ति'' इति दीपा उपायनभूतकारयानस्य प्रत्यर्पणनिर्णयं समर्थितवती। हैदराबादनगरे प्रवृत्ते कार्यक्रमे सचिनतेण्डूलकरः तस्यै कारयानं प्रदत्तवानासीत्। ''क्रीडापटूनां प्रोत्साहनाय अहं ओलम्पिक्स्साधकेभ्यः क्रीडापटुभ्यः कारयानं प्रदत्तवान्। दीपा अधुना कारयानस्य निर्वहणं कष्टकरमिति प्रोक्तवती। तया सह चर्चयित्वा अग्रिमनिर्णयं स्वीकरिष्यामि। सा धनदानाय विज्ञप्तिं कृतवती अस्ति। तद्विषये मया चिन्तनं करिष्यते'' इति अध्यक्षः चामुण्डेश्वरीनाथः अवादीत्।

## गुटेरसः प्रधानकार्यदर्शी

विश्वसंस्था-पोर्चुगलदेशस्य प्रधानमन्त्रिचरः आण्टोनियोगुटेरसः विश्वसंस्थायाः महाप्रधानकार्यदर्शिरूपेण सर्वानुमतेन चितः वर्तते। पञ्चदशानां राष्ट्राणां सदस्यानां भद्रमण्डल्याः सदस्याः गते सप्ताहे रहस्यतया सभाम् आयोजितवन्तः आसन्। तदा गुटेरसस्य नाम चित्वा सदस्याः तच्च नाम अनुमोदनाय त्रिनवत्युत्तरशतं देशान् प्रति प्रेषितवन्तः। सामान्यसभायाः अध्यक्षः पीटर्थाम्सनः मङ्गळवारे पत्रिकाप्रकटनं दत्वा अक्टोबरमासस्य त्रयोदशे सामान्यसभासभाङ्गणे प्रवर्त्स्यमाने कार्यक्रमे महाप्रधानकार्यदर्शिनः नियुक्तिः करिष्यते। सः साम्प्रतिकमहाप्रधानकार्यदर्शिनः बामकिमूनस्य उत्तराधिकारी भविष्यति। थाम्सनः अग्रिमसप्ताहे गुटेरसेन सह अनौपचारिकतया भाषिष्यते। तदा विश्वसंस्थायाः सर्वे सदस्याः अपि भागं वक्ष्यन्ति। साम्प्रतिकस्य महाप्रधानकार्यदर्शिनः बानिकिमूनस्य अधिकारावधिः डिसेम्बरमासस्य एकत्रिंशदिनाङ्के समाप्यते। एतस्य अधिकारावधिः पञ्चवत्सरपर्यन्तं भविष्यति। एषः पूर्वं विश्वसंस्थायाः निराश्रितानाम् उच्चायुक्तः अवर्तत।

## उग्रकृत्यानि नैव समर्थितानि

गोवा-गोवाराज्ये ब्रेजिल्-रष्या भारत-चीना-दक्षिणाफ्रिकादेशानां सहयोगेन संयुक्तरूपेण प्रचलिते ब्रिक्स्वार्षिकसमावेशस्य अन्तिमदिने पञ्चदेशानां प्रशासकनेतारः एकीभूय निर्णयमेकमङ्गीचक्रुः। ब्रिक्स्राष्ट्राणि उपरि कतिपयदिवसेषु केषाञ्चन राष्ट्राणां प्रशासकानां साहाय्येन आक्रमणानि कृत्वा भयोत्पादककृत्यानि कृतवन्तः। एतानि भयोत्पादककृत्यानि वयं खण्डयामः। कृत्यानि यानिकानि वा भवतु न वयं समर्थयामः तानि कुकृत्यानि वयं प्रत्यक्षंपरोक्षं च कृतानि दुष्कृत्यानि खण्डयामः। धार्मिक-राजकीयसामाजिकादि पापकृत्यानि न वयं समर्थयामः। अन्ताराष्ट्रियस्तरानि भयोत्पादककुकृत्यानि द्विपक्षीयदृष्ट्या अन्ताराष्ट्रियदृष्ट्या वयं प्रतिसन्ध्मः। दुष्टान् आततायिनः समूलं नाशयितुं वयं सर्वे एकीभूय आयोद्धुं अङ्गीकुर्मः इति पञ्चराष्ट्रनेतारः एककण्ठेन जगदुः।

## भयोत्पादकनिग्रहसन्धानं सफलं सञ्जातम्

पणजि-भारतस्य गोवाराज्ये बेनालिम् समीपे एकस्मिन् वासगृहे भारतस्य प्रधानमन्त्री श्री नरेन्द्रमोदी रष्याराष्ट्रस्य अध्यक्षेण पुटिनेन साकं चीनादेशस्य अध्यक्षेण क्सिजिन्पिंगेन च सार्धं पञ्चराष्ट्राणां ब्रिक्स् समावेशात् प्राक् द्विपक्षीय चर्चां चकार। उभावपि नेतारौ भयोत्पादनकृत्यानि सर्वे एकीभूय साङ्घिकेन प्रयत्नेन निर्मूलनीयानि। एतदर्थं वयं सर्वे भारतेन साकं मैत्रीं कृत्वा एकीभूय भयोत्पादनकृत्यानि निर्मूलयिष्यामः इति उपरी चक्रतुः। रष्यादेशप्रशासकाः भारतदेशाय शत्रून् दमयितुं सामर्थ्ययुतां एस्-४०० ट्रियंप् वायुरक्षणाक्षिपणि व्यवस्थां प्रकल्पयितुंसाहाय्यं प्रदास्यामः इति सन्धिपत्रे हस्ताङ्कनानि चक्रुः। भयोत्पादनकेन्द्रं भारतस्य समीपे एवास्ति। अस्य परिणामः समस्ते जगति व्यापितोऽस्ति। अतः भयोत्पादनानि वयं नाशयिष्याम इति भारत-रष्या देशयोः प्रशासकाधिकारिणः सन्धिपत्रे अङ्गीकाराय हस्ताङ्कनानि चक्रुः।

## वयं बुद्धमार्गम् अनुसरामः

लक्ष्मणपुरम्-अधुना सर्वत्र प्रपञ्चे भयोत्पादनविषयः एव चर्चापथे वर्तते। परं कतिपयदेशाः एव भयोत्पादनं पोषयन्ति। ते अन्यैः देशैः दूरीकरणीयाः। तदा ते देशाः एकाङ्गिपरिस्थितिम् अनुभवन्ति। अतः भयोत्पादनविरोधिभिः देशैः ऐक्यभावः आप्तव्यः। तदैव भयोत्पादनस्य निवारणं भवितुम् अर्हति'' इति वदन् भारतस्य प्रधानमन्त्री नरेन्द्रमोदिः परोक्षतया पाकिस्तानं प्रति सन्देशं प्रेषितवान्। पाकिस्तानेनाक्रान्तकाश्मीरप्रदेशे उग्राणाम् उपरि आक्रमणं कृत्वा पञ्चविंशतिरुग्राः हताः आसन् भारतीययोधैः। तत्पश्चात् इदानीमेव सार्वजनिकसभायां मोदिः अभाषत। परं सः भारतसेनया कृतस्य आक्रमणस्य विषयं न उरीकृतवान्। ऐतिहासिके ऐषबागरामलीलाकार्यक्रमे भागम् ऊढ्वा भाषमाणः मोदिः ''वस्तुतः युद्धं नास्माकं विकल्पः। वयमपि शान्तिमेव कामयामहे। सर्वदा बुद्धस्य अहिंसामार्गः एव अत्र इष्यते। आरम्भे यदा भारतदेशः भयोत्पादनविषयं प्रोक्तवान् तदा इतरे देशाः लक्ष्यं नादुः। यदा मुम्बैनगरे उग्राणामाक्रमणम् अभूत् तदा भयोत्पादनविचारः गम्भीरतया स्व्यकारि। अतः मुम्बैनगरस्याक्रमणस्य समनन्तरमेव जगत् भयोत्पादनविषये जागरूकम् अभवत्। यदा अहम् एकदा अमेरिका देशस्य कञ्चन अधिकारिणं प्रति भयोत्पादनविषयम् अवदं तदा सः तच्च शासनेन सुव्यवस्थया च सह सम्बद्धम् इति लघुतया एव प्रतिक्रियामदात्'' इति भयोत्पादनस्य गभीरतां प्रत्यपादयत्। स्वप्रतिपादनस्य समर्थनाय बलिकायाः चित्रम् उररीकृतवान्। भयोत्पादनं मानवकुलस्य शत्रुः इति सः अकथयत्। पुनः अग्रे भाषमाणः मोदिः ''रामायणे सीताम् अपहृत्य यदा रावणः नयन् आसीत् तदा जटायुः धैर्येण रावणेन सह अयुद्ध्यत ।इदमेव युद्धं जगति भयोत्पादनस्य प्रथमविरोधः अवर्तत। अतः जटायुषा अस्माभिः पाठः पठनीयः। सर्वदा वयं शान्तिमेव भजामः। परं कासुचित् परिस्थितिषु युद्धमपि अनिवार्यं भवति। शत्रूणां संहाराय भगवान् श्रीकृष्णः सुदर्शनचक्रम् उपयुक्तवान्। तथैव बुद्धः महात्मागान्धिश्च अहिंसामार्गम् अनुसृतवन्तौ। अतः सर्वविधा दर्शनेतारः सन्ति अस्माकं देशे। सुदर्शनचक्रमोहनचरकयोश्च मध्ये समतोलनम् अस्माभिः साधितम्'' इति प्रधानी व्यवृणोत्।

## अङ्गसानसूक्यै सर्वकारीयातिथ्यम्

नवदिल्ली-म्यान्मारप्रजाप्रभुत्वस्य समरकर्त्री अङ्गसानसूकी सप्तदशदिने भारतमागमिष्यति (अद्य)। सा तदा त्रिदिनपर्यन्तम् अत्र स्थास्यति। तदा तस्यै सर्वकारीयातिथ्यं प्रदास्यते इति भारतसर्वकारः नरणैषीत्। तस्याः उपस्थितिसन्दर्भे शिष्टाचारानुसारेण यथा अन्यदेशीयसर्वकारस्य मुख्यस्थाय उपचारः दीयते तथा उपचारः तस्यै प्रदास्यते। सूकी अधुना म्यान्मारदेशस्य विदेशाङ्गमन्त्रिणी वर्तते। तथैव सर्वकारसूचनाप्रदात्री अपि अस्ति। गतवत्सरस्य नवम्बरमासे सूक्याः नेतृत्वस्य पक्षः सर्वानुमतेन अधिकारं स्वीकृतवान् अवर्तत। पक्षस्य अधिकारस्वीकरणसमनन्तरम् - इदम्प्रथमतया सा भारतं प्रति आगच्छन्ती वर्तते। सा वस्तुतः अध्यक्षस्थाने अथवा प्रधानमन्त्रिस्थाने नास्ति। तथापि तत्स्थानोचितसर्वकारोपचारः तस्यै दीयते। भारतस्य सन्दर्शनसन्दर्भे सा राष्ट्रपतिना प्रधानमन्त्रिणा विदेशाङ्गमन्त्रिणा च सह वार्तालापं करिष्यति। तस्याः सन्दर्शनेन भारतस्यम्यान्नदेशयोः द्विपक्षीय - बान्धव्यम् इतोऽपि अभिवर्धते इति विदेशाङ्गवक्ता विकासस्वरूपः अवादीत्

## मङ्गलगोयात्रा आरप्स्यते

हुब्बळ्ळी-नवम्बरमासस्य अष्टमे दिने बेङ्गळूरुनगरात् मङ्गलगोयात्रा आरप्स्यते इति रामचन्द्रपुरमठस्य श्री राघवेश्वरस्वामिपादा अघोषयन्। पत्रकारगोष्ठ्यां भाषमाणाः श्रीपादाः मङ्गलपरण्डेमहाशयस्य हुतात्मताम् अस्मरन्। गौः न कश्चित् प्राणी, अपि तु हिन्दुस्थानस्य प्राणः इति श्रीचरणा अवदन्। आदर्शगोशालां प्रारम्भयितुं योगगुरवे श्री बाबारामदेवाय साह्यं दास्यामः। तस्य कैङ्कर्यं श्लाघनीयम् इति च श्रीचरणाः अब्रुवन्। हिन्दुमठानां संशासने सर्वकारः अनावश्यकतया हस्तक्षेपं कस्मात् करोति ? इति श्रीचरणाः अपृच्छन्। मठाः धार्मिकान् सांस्कृतिकांश्च शैक्षणिकांश्च कार्यक्रमान् कुर्वन्ति। तत्र तेषां स्वातन्त्र्यम् अस्तु। स्वातन्त्र्यापहरणं मा भूदिति श्रीचरणा अवदन्।